# 5 प्रभातवर्णनम्

चन्द्रः अस्तं गच्छति
सूर्यः उदयं गच्छति।
परितो भवति प्रकाशः
मन्दं चलति समीरः
मधुपो भवति सधीरः॥





कलिकावृन्दं विकसति
लतिकावृन्दं विलसति।
निद्रा तन्द्रा भग्ना
जनता कर्मणि लग्ना
सकले नव उल्लासः
वदने वदने हासः॥

पथि पथि जनसञ्चारः
नूपुर-रव-झङ्कारः
विटपे खगकुलरवः
चरितुं चलिता गावः॥





Get More Learning Materials Here : CLICK HERE www.studentbro.in

हस्ते हस्ते पत्रम्
वदने वदने स्तोत्रम्
खेलति बालकवृन्दं
गीतं गायं गायम् ॥

– वासुदेव द्विवेदी शास्त्री



## Glossary

**परितः** in all directions **समीरः** wind **मधुपः** - wasp/hornet **सधीरः** patient **तन्द्रा** sleepiness **भग्ना** broken **हासः** smile **रवः** noise **खगः** bird **विटपे** on the branch **गावः** cows **लग्ना** is busy **पथि** on the way

## Exercise

**1. Pronounce the following words correctly :**

चन्द्रः, प्रकाशः, वृन्दम्, लतिकावृन्दम्, निद्रा, तन्द्रा, भग्ना, लग्ना, उल्लासः, हासः, जनसञ्चारः, झङ्कारः।

**2. Answer the following questions selecting the correct options given below them :**

(1) सूर्योदयः कदा भवति ?

(क) सूर्योदयः सायंकाले भवति।

(ख) सूर्योदयः प्रभाते भवति।

(ग) सूर्योदयः मध्याह्ने भवति।

(2) सूर्योदयस्य अनन्तरं जनाः किं कुर्वन्ति ?

(क) सूर्योदयस्य अनन्तरं जनाः कर्मणि लग्नाः भवन्ति।

(ख) सूर्योदयस्य अनन्तरं जनाः वार्तालापमग्नाः भवन्ति।

(ग) सूर्योदयस्य अनन्तरं जनाः निद्रामग्नाः भवन्ति।



Get More Learning Materials Here : CLICK HERE www.studentbro.in

(3) प्रभातकाले वदने वदने किम् अस्ति ?

(क) वदने वदने चिन्ता अस्ति।

(ख) वदने वदने रुदनम् अस्ति।

(ग) वदने वदने हासः अस्ति।

(4) बालकवृन्दं प्रभातकाले किं करोति ?

(क) बालकवृन्दं प्रभातकाले खेलति।

(ख) बालकवृन्दं प्रभातकाले शयनं करोति।

(ग) बालकवृन्दं प्रभातकाले पूजां करोति।

**3. Follow the example and frame sentences using the words from the brackets :**

(अश्वः, गजः, शशकः, महिषः)

**Illustration :** मन्दं चलति समीरः।

(1) शीघ्रं ________________ ।

(2) मन्दं ________________ ।

(3) शीघ्रं ________________ ।

(4) मन्दं ________________ ।

**4. Find out the antonym of the given words from the bracket and write them :**

(अधीरः, शीघ्रम्, जागरणम्, अस्तः)

(1) मन्दम् ________________ । (2) उदयः ________________ ।

(3) सधीरः ________________ । (4) निद्रा ________________ ।

**5. Find out the synonyms of the words from the brackets and write them :**

(सुधाकरः, दिवाकरः, भ्रमरः, अनिलः, धेनवः)

(1) समीरः ________________ ।

(2) सूर्यः ________________ ।

(3) मधुपः ________________ ।

(4) चन्द्रः ________________ ।

(5) गावः ________________ ।



Get More Learning Materials Here : CLICK HERE www.studentbro.in

6. **Write the following lines of the poem in good hand writing :**

कलिकावृन्दं विकसति। ______

लतिकावृन्दं विलसति। ______

निद्रा तन्द्रा भग्ना। ______

जनता कर्मणि लग्ना। ______

सकले नव उल्लासः। ______

वदने वदने हासः। ______

7. **Follow the example and use the word 'वृन्द' with the other words given in brackets :**

(सखी, मित्र, गायक, वादक, गोप, बाल)

**Illustration :** सखी – सखीवृन्द

**Activity**

- Find out such other poems describing 'morning' from the library and try to sing with rhythm them.
- Draw the picture of a village or a city of morning and apply proper colours.
- Get the information of yourself and the people around you, about morning routine and note them :

**हसाम:**

''मम शुनकः कुत्रापि अदृश्यतां गतः।''

''एवम्! तर्हि वर्तमानपत्रे विज्ञापिकां प्रकाशयतु भवान्।''

''किं तेन ? मम शुनकः पठितुं न जानाति।''



Get More Learning Materials Here : CLICK HERE www.studentbro.in